# संस्कृत-वार्ता:

दिनाङ्क :- 26.06.2024 सायम् - 06:20

<u>आदौ-मुख्यवार्ता:</u>

- भारतीयजनतापार्टीतिदलस्य वरिष्ठनेता सांसद: च ओमबिरला: अद्य अनवरतं द्वितीयवारं लोकसभाया: अध्यक्ष:चित:। प्रधानमन्त्री नरेन्द्रमोदी विपक्षदलीय: नेता राहुलगांधी अन्येषां दलानाञ्च नेतार: नवीन अध्यक्षाय शुभकामना: अयच्छन्।
- भारतेन सबलं प्रतिपादितं यत् स्थायि-अस्थायि- श्रेण्ययो: विस्तारं कृत्वा संयुक्तराष्ट्र-सुरक्षापरिषदि संशोधनस्य समय: आगत:।
- केन्यायां नवकरप्रस्तावं अभिलक्ष्य प्रदर्शनकारिभि: संसत्भवने आक्रमणं विधाय तदीय एक: भाग: अग्निसात् कृत:। अनन्तरं आरक्षिणां कार्याचरणे पञ्च प्रदर्शनकारिण: मृता:।
- अद्य मादक पदार्थानां दुरुपयोगं अवैधतस्करणं च विरुध्य अन्ताराष्ट्रीय दिवस: विद्यते।
- तरणस्पर्धायां धनिधि-देसिंघु: श्रीहरि नटराज: च वैश्विक-मानांकनस्य माध्यमेन पेरिस-ओलम्पिक-स्पर्धायै स्थानं प्राप्तवन्तौ।

<u>लोकसभा-अध्यक्ष:</u>

भारतीय जनतापार्टीतिदलस्य वरिष्ठनेता सांसद: च ओमबिरला: अद्य अनवरतं द्वितीयवारं अष्टादश्या: लोकसभाया: अध्यक्ष:चित:। असौ ध्वनिमतेन अध्यक्षपदाय चित:जात:। विपक्षदलेन अस्मैपदाय कांग्रेसदलीय: सांसद: के.सुरेश: स्वीय-प्रत्याशी उद्घोषित: परञ्च तस्य कृते अनेन दलेन सदने मतदानाय बलं न प्रदत्तम्। अध्यक्षपदस्य निर्वाचनान्तरं प्रधानमन्त्री नरेन्द्रमोदी विपक्षस्य च नेता राहुलगांधी अथ च संसदीयकार्यमन्त्री किरेन-रिजीजू: श्रीबिरला: अध्यक्षस्य आसनं समीपं नीतवन्त:। इत: पूर्वं यदा अद्य प्रात: सदनस्य उपवेशनं समारब्धम् तदा प्रधानमन्त्री अपि च राष्ट्रिय-जनतान्त्रिक-संयुते: द्वादश अन्ये च नेतार: श्रीबिरला इत्यस्मै अध्यक्षपदनिर्वाचनस्य प्रस्तावं प्रख्यापितवन्त:। विपक्षत: शिवसेनादलनेता अरविन्द-सावन्त: राष्ट्रवादी-कांग्रेसपार्टीतिदलस्य सुप्रियासुले समाजवादी पार्टीदलस्य आनन्द-भदौरिया: च श्रीसुरेशस्य पक्षे प्रस्तावं प्रस्तावितवन्त:।

निजोद्बोधने श्री ओमबिरला: सदनस्य सर्वेभ्य: सांसदेभ्य: धन्यवादं प्रदत्तवान्। निर्वाचित: अध्यक्ष: श्री बिरला: अभिव्यक्तवान् यत् सदनगतमूल्यानां लोकतान्त्रिक परम्पराणां च समृद्धि: तस्य प्राथमिकता भविष्यति। असौ अग्रे अवोचत् यत् अष्टादश-लोकसभा अखिले हि विश्वे लोकतन्त्रस्य महती उत्सवानुकूला वर्तते। यतोहि चतुषष्टिकोट्यधिका: मतदातार: सोत्साहं निर्वाचने भागं स्वीकृतवन्त:। अपि च विगतेषु दशवर्षेषु जनानां आकांक्षा: आशा: अपेक्षाश्च संवर्धिता:। एतत्सर्वं सांसदानां कर्तव्यमस्ति यत् तै: जनानां आकांक्षा: प्रभाविरीत्या सम्पूरणीया:। अध्यक्षेण सबलं प्रतिपादितवान् यत् सदने गतिरोधं अतिरिच्य पारस्परिकी चर्चा विवादश्च करणीय:। अथ च विरोधस्य माध्यम: सदनस्य गरिम्ण: अनुरूपो भवेत्। असौ पुन: प्रावोचत् यत् सदनस्य गरिमानं सीमानां च अनुकूलं स्थापयितुं एव सभापति: कठोराचारणं समाचरति। तत: पूर्वं प्रधानमन्त्री नरेन्द्र मोदी अध्यक्षपदाय निर्वाचिताय श्रीबिरलाइत्यस्मै शुभकामना: अयच्छत्। उक्तवान् च यत् श्री बिरलाइत्यस्य द्वितीयवारं पुन: निर्वाचिते सति प्रसन्नम् अनुभवामि। विपक्षस्य नेता राहुलगांधी अपि तस्मै वर्धापनानि प्रदत्तवान् प्रोदीरितवान् च यत् सदनमिदं जनानां ध्वने: प्रतिनिधित्वं करोति। असौ श्री बिरला इत्यस्मै सदनस्य उचितसञ्चालने विपक्षस्य सहयोगस्य आश्वासनमपि प्रदत्तवान्।

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले** www.newsonair.gov.in **इत्यत्र, अथ** newsonair **चलदूरभाषीय-तन्त्रांशे अपि उपलब्धो भविष्यति**

<u>भारतं-संयुक्तराष्ट्र-महासभा</u>

भारतेन सबलं प्रतिपादितं यत् स्थायि-अस्थायि-श्रेण्ययो: विस्तारं कृत्वा सुरक्षापरिषदि संशोधनस्य समय: आगत:। येन हि संस्थेयं वैश्विक-संघर्षै: प्रभाविविधिना निवारयितुं सक्षमा भवेदिति। सुरक्षापरिषद: वार्षिक प्रतिवेदने संयुक्तराष्ट्र-महासभायां चर्चावधौ भारतस्य प्रतिनिधि: प्रतीक माथुर: प्रोदीरितवान् यत् सुरक्षापरिषदि साम्प्रतमपि विश्वासस्य संवर्धनं अथ च प्रदर्शने संशोधनस्यावश्यकता दरीदृश्यते।

<u>केन्या</u>

केन्यायां प्रदर्शनकारिभि: संसत्भवने आक्रमणं विधाय तदीय एक: भाग: अग्निसात् कृत:। अनन्तरं आरक्षिणां कार्याचरणे पञ्च प्रदर्शनकारिण: मृता:। संसत्द्वारा एकस्य वित्त-विधेयकस्य

अभ्युपगमनानन्तरं आदेशे विधेयकं विरूद्ध प्रदर्शनानि भवन्ति। अस्य विधेयकस्य द्वारा प्रशासनेन नैकेषु करेषु वृद्धि: कृता। जगत: नैकै: देशै: केन्यायां हिंसा चरणं आलक्ष्य चिंता प्रकटिता। जनेभ्य: शांति-स्थापनाय अभ्यर्थना कृता।

## अन्ताराष्ट्रीय-मादक-पदार्थ-दिवस

अद्य मादक पदार्थानां दुरुपयोगं अवैधतस्करणं च विरुध्य अन्ताराष्ट्रीय दिवस: विद्यते। अयम् दिवस: विश्व-औषध-दिवस रुपेण अपि सामान्यते। साक्ष्येन स्पष्टं अस्ति-स्थगने निवेश: आवश्यक: अस्य वर्षस्य विषय: वर्तते। संयुक्त राष्ट्र महासभया गतशताब्दस्य सप्तशीति: तमे वर्षे दिसम्बर मासस्य सप्तमे दिने स्वीकृते प्रस्तावे मादक पदार्थानां दुरुपयोगं अवैध-तस्करणं च विरूध्य दृढ़संकल्प: कृत:। तदनु प्रतिवर्षं जूनमासस्य षड्विंशे दिने अन्ताराष्ट्रीय दिवस रूपेण एतत् आमान्यते।

## देहलीमुख्यमंत्री

आमआदमी पार्टी इति दलस्य संयोजकाय अरविंद केजरीवालाय सर्वोच्च-न्यायालयेन दिल्ली-उच्च-न्यायालयस्य निर्णयं समाह्वान युताया: स्वीय-याचिकाया: प्रत्यावर्तनाय अनुमति: प्रदत्ता। कथिते मद्य-नीति-सम्बन्धित-धनशोधन-प्रकरणे केजरीवालस्य मुक्तियाचिकाया: निम्न-न्यायालयस्य निर्णये ह्य: दिल्ली-उच्च-न्यायालयेन अल्पावधिकनिरोधनं कृतम्।

## तरण-स्पर्धा/उदकप्लुत स्पर्धा

तरणस्पर्धायां धनिधि-देसिंघु: श्रीहरि नटराज: च वैश्विक-मानांकनस्य माध्यमेन पेरिस-ओलम्पिक-स्पर्धायै स्थानं प्राप्तवन्तौ। अस्मिन् संदर्भे भारतीयतरण-स्पर्धा-महासंघेन घोषणा कृता। फरवरी मासे फिलिपींस देशे आयोजितायां प्रति स्पर्धायां चतुर्दश-वर्षीया धनिधि: महिलानां शतमीटर-स्पर्धायां चतुर्थं स्थानं प्राप्तवती। तत्रैव द्विशत-मीटर प्रति स्पर्धायां राष्ट्रीय-मानांक-धारक: नटराज: पुरुषाणां शतमीटर बैक स्ट्रॉक इति स्पर्धायां स्वर्ण पदकं प्राप्तवान्।

## आईसीसी-टी-20

पुरूषाणां विंशति:-प्रतिविंशति: विश्व-चषक क्रिकेट-स्पर्धा-मालिकायां श्व: प्रथमे उपान्त्यचक्रे अफगानिस्तान दलं दक्षिण-अफ्रीका दलं विरूद्ध क्रीडिष्यति। अनन्तरं द्वितीये

उपान्त्यचक्रे श्वः सायं भारत इंग्लैण्डदलयोः मध्ये स्पर्धा गुयानानगरे भविष्यति। ततः परम् निर्णायकस्पर्धा शनिवासरे भविष्यति।

।। इति वार्ताः ।।